## सेऽसिचि कृतचृतच्छृदतृदनृतः। (५७/२५०६)

सकारादावसिचि आर्धधातुके कृत चृत छृद तृद नृत इत्येतेभ्यो धातुभ्यो वा इडागमो भवति। कृत – कर्त्स्यति। अकर्त्स्यत्। चिकृत्सति। कर्तिष्यति। अकर्तिष्यत्। चिकर्तिषति। चृत – चर्त्स्यति। अचर्त्स्यत्। चिचृत्सति। चर्तिष्यति। अचर्तिष्यत्। चिचर्तिषति। छृद – छर्त्स्यति। अच्छर्त्स्यत्। चिच्छृत्सति। छर्दिष्यति। अच्छर्दिष्यत्। चिच्छर्दिषति। तृद – तर्त्स्यति। अतर्त्स्यत्। तितृत्सति। तर्दिष्यति। अतर्दिष्यत्। तितर्दिषति। नृत – नर्त्स्यति। अनर्त्स्यत्। निनृत्सति। नर्तिष्यति। अनर्तिष्यत्। [1]निनर्तिषति। से इति किम्? कर्तिता[2]। असिचि इति किम्? अकर्तीत्[3]॥

## गमेरिट् परस्मैपदेषु। (५८/२४०१)

गमेर्धातोः सकारादेरार्धधातुकस्य परस्मैपदेषु[4] इडागमो भवति। गमिष्यति। अगमिष्यत्। जिगमिषति। गमेः इति किम्? चेष्यति[5]। इड्ग्रहणं नित्यार्थम्। परस्मैपदेषु इति किम्? संगंसीष्ट। संगंस्यते। संजिगंसते। संजिगंसिष्यते। अधिजिगांसते। अधिजिगांसिष्यते। गमेरिङादेशस्य 'अज्झनगमां सनि' (६. ४. १६/२६१४) इति दीर्घत्वम्। से इत्येव, [6]गन्तास्मि, गन्तास्वः, गन्तास्मः। आत्मनेपदेन समानपदस्थस्य गमेः अयमिडागमो नेष्यते। अन्यत्र सर्वत्रैवेष्यते। कृत्यपि हि भवति, परस्मैपदलुकि च, [7]संजिगमिषिता[8], अधिजिगमिषिता व्याकरणस्य, जिगमिष त्वम् इति। पदशेषकारस्य पुनरिदं दर्शनम् – गम्युपलक्षणार्थं परस्मैपदग्रहणम्, परस्मैपदेषु यो गमिरुपलक्षितस्तस्मात् सकारादेरार्धधातुकस्य इड् भवति। तन्मतेन संजिगंसिता, अधिजिगंसिता व्याकरणस्य [9]इत्येव भवितव्यम्॥

## न वृद्भ्यश्चतुर्भ्यः। (५९/२३४८)

वृतादिभ्यश्चतुर्भ्यः उत्तरस्य सकारादेरार्धधातुकस्य परस्मैपदेषु इडागमो न भवति। वृत् – वर्त्स्यति। अवर्त्स्यत्। विवृत्सति। [10]वृधू – वर्त्स्यति। अवर्त्स्यत्। विवृत्सति। शृधू – शर्त्स्यति। अशर्त्स्यत्। शिशृत्सति। स्यन्दू – स्यन्त्स्यति। अस्यन्त्स्यत्। सिस्यन्त्सति। चतुर्भ्यः इति न [11]वक्तव्यम्, वृद्ग्रहणं हि तत्र द्युतादिपरिसमाप्त्यर्थं क्रियते – कृपू सामर्थ्ये वृत् इति, तदेव यदि वृतादि[12]समाप्त्यर्थमपि विज्ञायते न किञ्चिदनिष्टं प्राप्नोति? तत् क्रियते स्यन्देरूदिल्लक्षणमन्तरङ्गमपि विकल्पं प्रतिषेधो [13]यथा बाधेत इति। चतुर्ग्रहणे हि सति तात्पर्येण स्यन्दिः संनिधापितो भवति। परस्मैपदेषु इत्येव, वर्तिष्यते। वर्तिषीष्ट। अवर्तिष्यत। विवर्तिषते। अत्रापि आत्मनेपदेन समानपदस्थेभ्यो वृतादिभ्य इडागम इष्यते। अन्यत्र सर्वत्र प्रतिषधः। कृत्यपि हि परस्मैपदलुकि च प्रतिषेधो भवति, विवृत्सिता, विवृत्स त्वम् इति॥

---

1. निनर्तिषते क. 2. नर्तिता इत्यधिकम् ब. 3. अनर्तीत् इत्यधिकम् ब. ह. 4. परतः इत्यधिकम् क. 5. स्तोष्यति इत्यधिकम् ब. 6. गन्ता गन्तारौ गन्तारः क. इ. 7. एवं मन्यते योगविभागोऽत्र कर्तव्यः। गमेरिट्। से इति वर्तते। सकारादेव आर्धधातुके गमेः इट् भवति। ततः परस्मैपदेषु इति नियमार्थः। स च नियमो यदि अविशेषेण स्यात् पूर्वो योगः नियमार्थः स्यात्। स च तुल्यजातीयापेक्षो नियमः इत्यधिकम् ड. 8. व्याकरणस्य इत्यधिकम् क. ह. 9. इति भवितव्यमेव क. 10. वृधू पूर्ववत् इ. 11. कर्तव्यम् ब. 12. परिसमाप्त्यर्थम् इ. 13. यथा नास्ति इ.